shrI HanumadashtottarashatanAma stotram 8

# श्रीहनुमदष्टोत्तरशतनामस्तोत्रम् ८

## Document Information

Text title : hanumadaShTottarashatanAmastotram 8

File name : hanumadaShTottarashatanAmastotram8.itx

Category : aShTottarashatanAma, hanumaana

Location : doc_hanumaana

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran

Source : ParAsharasamhita Hanumachcharitra Vol 2 pages 122-125

Latest update : September 30, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# श्रीहनुमदष्टोत्तरशतनामस्तोत्रम् ८

श्रीपराशरः -

स्तोत्रान्तरं प्रवक्ष्यामि शृणु मैत्रेय तत्त्वतः ।
अष्टोत्तरशतं नाम्नां हनुमत्प्रतिपादकम् ॥

आयुरारोग्यफलदं पुत्रपौत्रप्रवर्धनम् ।
गुह्याद्गुह्यतमं स्तोत्रं सर्वपापहरं नृणाम् ॥

अस्य श्रीहनुमदष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य विभीषण ऋषिः ।
पङ्क्ती छन्दः । श्रीहनुमान् परमात्मा देवता ।
मारुतात्मज इति बीजम् । अञ्जनासूनुरिति शक्तिः ।
वायुपुत्र इति कीलकम् ।
मम श्रीहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ॥

श्री अभूतपूर्वडिम्भ श्री अञ्जनागर्भ सम्भवः ।
नभस्वद्वरसम्प्राप्तो दीप्तकालाग्निसम्भवः ॥ १॥

भूनभोऽन्तरभिन्नादस्फुरद्गिरिगुहामुखः ।
भानुबिम्बफलोत्साहो पलायितविधुन्तुदः ॥ २॥

ऐरावतग्रहाव्यग्रो कुलिशग्रसनोन्मुखः ।
सुरासुरायुधाभेद्यो विद्यावेद्यवरोदयः ॥ ३॥

हनुमानिति विख्यातो प्रख्यातबलपौरुषः ।
शिखावान् रत्नमञ्जीरो स्वर्णकृष्णोत्तरच्छदः ॥ ४॥

विद्युद्वलययज्ञोपवीतद्युमणिमण्डनः ।
हेममौञ्जीसमाबद्धशुद्धजाम्बूनदप्रभः ॥ ५॥

कनत्कनककौपीनो वटुर्वटुशिखामणिः ।
सिंहसंहननाकारो तरुणार्कनिभाननः ॥ ६॥

वशंवदीकृतमनास्तप्तचामीकरेक्षणः ।
वज्रदेहो वज्रनखः वज्रस्पर्शोग्रवालजः ॥ ७॥

अव्याहतमनोवेगो हरिर्दाशरथानुगः ।
सारग्रहणचातुर्यश्शब्दब्रह्मैकपारगः ॥ ८॥

पम्पानदीचरो वाग्मी रामसुग्रीवसख्यकृत् ।
स्वामिमुद्राङ्कितकरो क्षितिजान्वेषणोद्यमः ॥ ९॥

स्वयम्प्रभासमालोको बिलमार्गविनिर्गमः ।
आम्बोधिदर्शनोद्विग्नमानसोङ्गदधैर्यदः ॥ १०॥

प्रायोपदिष्टप्लवगप्राणत्रातपरायणः ।
अदेवदानवगतिः अप्रतिद्वन्द्वसाहसः ॥ ११॥

स्वदेहसम्भवज्जङ्घामेरुद्रोणीकृतार्णव । मेरु
सागरश्रुतवृत्तान्तमैनाककृतपूजनः ॥ १२॥

अणोरणीयान्महतो महीयान् सुरसाऽर्थितः ।
त्रिंशद्योजनपर्यन्तच्छायाछायाग्रहान्तकः ॥ १३॥

लङ्काहङ्कारशमनश्शङ्काटङ्कविवर्जितः ।
हस्तामलकवद्दष्टराक्षसान्तः पुराखिलः ॥ १४॥

चितादुरन्तवैदेहीसम्पादनफलश्रमः ।
मैथिलीदत्तमाणिक्यो भिन्नाशोकवनद्रुमः ॥ १५॥

बलैकदेशक्षपणः कुमाराक्षनिषूदनः ।
घोषितस्वामिविजयस्तोरणारोहणोच्छ्रियः ॥ १६॥

रणरङ्गसमुत्साहो रघुवंशजयध्वजः ।
इन्द्रजिद्युद्धनिर्भीतो ब्रह्मास्त्रपरिवर्तनः ॥ १७॥

प्रभाषितदशग्रीवो भस्मसात्कृतपट्टणः ।
वार्धिनाशान्तवालर्चिः कृतकृत्योत्तमोत्तमः ॥ १८॥

कल्लोलास्फालवेलान्तपारावारोपरिप्लवः ।
स्वर्गमाकाङ्क्षकीशौघद्दक्ककोरेन्दुमण्डलः ॥ १९॥ ??

मधुकाननसर्वस्वसन्तर्पितवलीमुखः ।
दृष्टा सीतेति वचनात्कोसलेन्द्राभिनन्दितः ॥ २०॥

स्कन्धस्थकोदण्डधरः कल्पान्तघननिस्वनः ।
सिन्धुबन्धनसन्नाहस्सुवेलारोहसम्भ्रमः ॥ २१॥

अक्षाख्यबलसंरुद्धलङ्काप्राकारभञ्जनः ।
युध्यद्वानरदैतेयजयापजयसाधनः ॥ २२॥

रामरावणशस्त्रास्त्रज्वालाजालनिरीक्षणः ।
मुष्टिनिर्भिन्नदैत्येन्द्रो मुहुर्नुतनभश्चरः ॥ २३॥

जाम्बवन्नुतिसंहृष्टो समाक्रान्तनभश्चरः ।
गन्धर्वगर्वविध्वंसी वश्यद्दिव्यौषधीनगः ॥ २४॥

सौमित्रिमूर्छाशान्त्यर्थे प्रत्यूषस्तुष्टवानरः ।
रामास्त्रध्वंसितेन्द्रारिसैन्यविन्यस्तविक्रमः ॥ २५॥

हर्षविस्मितभूपुत्रीजयवृत्तान्तसूचकः ।
राघवीराघवारूढपुष्पकारोहकौतुकः ॥ २६॥

प्रियवाक्तोषितगुहो भरतानन्ददायकः ।
श्रीसीतारामपट्टाभिषेकसम्भारसम्भ्रमः ॥ २७॥

काकुत्स्थदयितादत्तमुक्ताहारविराजितः ।
रामायणसुधास्वादरसिको रामकिङ्करः ॥ २८॥

अमोघमन्त्रयन्त्रौघस्मृतिनिर्धूतकल्मषः
भजत्किम्पुरुषद्वीपो भविष्यत्पद्मसम्भवः ।
आपदुद्धारकः श्रीमान् सर्वाभीष्टफलप्रदः ॥ २९॥

नामानीमानि यः कश्चिदनन्यगतिकः पठेत् ।
मृत्योर्मुखे राजमुखे निपतन्नावसीदति ॥ ३०॥

विश्वाकर्षणविद्वेषस्तम्भनोच्चाटनादयः ।
सिध्यन्ति पठनादेव नात्र शङ्का कुरु क्वचित् ॥ ३१॥

नामसङ्ख्याप्यपूपानि योदत्ते मन्दवासरे ।
छायेव तस्य सततं सहायो मारुतिर्भवेत् ॥ ३२॥

॥ इति श्रीहनुमदष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, PSA Easwaran

*shrI HanumadashtottarashatanAma stotram 8*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*